M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 1526

Title: Taittiya Upnishad

1526

Incomplete

Taittiriya Upnishad -	Title
	Author
	Editor
	Year, Vols.
810	Publisher
1526	Remarks

श्रीगणेशाय नमः॥ सहनाववतु। सहनौ भुनक्तु। सहवीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै।
ॐ शान्तिः ३। हरिः ॐ। ब्रह्मविदाप्नोति परं। तदेषाभ्युक्ता। सत्यं ज्ञानमनंतं ब्रह्म। यो वेद निहितं गुहायां परमे व्यो
मन्। सोश्नुते सर्वान्कामान्सह। ब्रह्मणा विपश्चितेति। तस्माद्वा एतस्मादात्मन आकाशः संभूतः। आकाशा
द्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योन्नं। अन्नात्पुरुषः। स वा एष
पुरुषोन्नरसमयः। तस्येदमेव शिरः। अयं दक्षिणः पक्षः। अयमुत्तरः पक्षः। अयमात्मा। इदं पुच्छं प्रतिष्ठा। त
दप्येषः श्लोको भवति॥१॥ अन्नाद्वै प्रजाः प्रजायंते। याः काश्च पृथिवीं श्रिताः। अथो अन्नेनैव जीवंति। अ
थैनदपि यंत्यंततः। अन्नं हि भूतानां ज्येष्ठं। तस्मात्सर्वौषधमुच्यते। सर्वं वै तेन्नमाप्नुवंति। येन्नं ब्रह्मोपासते। अ
न्नं हि भूतानां ज्येष्ठं। तस्मात्सर्वौषधमुच्यते। अन्नाद्भूतानि जायंते। जातान्यन्नेन वर्धंते। अद्यतेत्ति च भूतानि।
तस्मादन्नं तदुच्यत इति। तस्माद्वा एतस्मादन्नरसमयात्। अन्योंतर आत्मा प्राणमयः। तेनैष पूर्णः। स वा एष पुरु
षविध एव। तस्य पुरुषविधतां। अन्वयं पुरुषविधः। तस्य प्राण एव शिरः। व्यानो दक्षिणः पक्षः। अपान उत्तरः
पक्षः। आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा। तदप्येषः श्लोको भवति॥२॥ प्राणं देवा अनुप्राणंति। मनु
ष्याः पशवश्च ये। प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यते। सर्वमेव त आयुर्यंति। ये प्राणं ब्र
ह्मोपासते। प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यत इति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य।
तस्माद्वा एतस्मात्प्राणमयात्। अन्योंतर आत्मा मनोमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य
पुरुषविधतां। अन्वयं पुरुषविधः। तस्य यजुरेव शिरः। ऋग्दक्षिणः पक्षः। सामोत्तरः पक्षः। आदेश
आत्मा। अथर्वांगिरसः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥३॥ यतो वाचो निवर्तंते। अप्राप्य मनसा

ब्रह्म. सह। आनंदं ब्रह्मणो विद्वान्। न बिभेति कदाचनेति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्मान्मनो
मयात्। अन्योंतर आत्मा विज्ञानमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधतां। अन्वयं पुरुषवि
उ १ धः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवती।
ति॥४॥ विज्ञानं यज्ञं तनुते। कर्माणि तनुतेपि च। विज्ञानं देवाः सर्वे। ब्रह्म ज्येष्ठमुपासते। विज्ञानं ब्रह्म चेद्वेद। तस्मा
च्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा। सर्वान्कामान्समश्नुत इति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा ए
तस्माद्विज्ञानमयात्। अन्योंतर आत्मानंदमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधतां। अन्व
यं पुरुषविधः। तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः। आनंद आत्मा। ब्रह्म पुच्छं प्रतिष्ठा। त
दप्येष श्लोको भवति॥५॥ असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद। संतमेनं ततो विदु
रिति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य। अथातो नुप्रश्नाः। उताविद्वानमुं लोकं प्रेत्य। कश्चन गच्छती३
आहो विद्वानमुं लोकं प्रेत्य। कश्चित्समश्नुता३ उ। सो कामयत। बहु स्यां प्रजायेयेति। स तपो तप्यत। स तपस्तप्त्वा
इदं सर्वमसृजत। यदिदं किंच। तत्सृष्ट्वा। तदेवानुप्राविशत्। तदनुप्रविश्य। सच्च त्यच्चाभवत्। निरुक्तं चानि
रुक्तं च। निलयनं चानिलयनं च। विज्ञानं चाविज्ञानं च। सत्यं चानृतं च सत्यमभवत्। यदिदं किंच। तत्सत्यमित्याच
क्षते। तदप्येष श्लोको भवति॥६॥ असद्वा इदमग्र आसीत्। ततो वै सदजायत। तदात्मानं स्वयमकुरुत। त
स्मात्तत्सुकृतमुच्यत इति। यद्वै तत्सुकृतं। रसो वै सः। रसं ह्येवायं लब्ध्वानंदी भवति। को ह्येवान्यात्कः प्रा
ण्यात्। यदेष आकाश आनंदो न स्यात्। एष ह्येवानंदयाति। यदा ह्येवैष एतस्मिन्नदृश्येनात्म्ये निरुक्ते निलय १
नेभयं प्रतिष्ठां विंदते। अथ सोभयं गतो भवति। यदा ह्येवैष एतस्मिन्नुदरमंतरं

रं कुरुते। अथ तस्य भयं भवति। तत्त्वेव भयं विदुषो मन्वानस्य। तदप्येष श्लोको भवति ॥ ७॥ भीषास्मा
द्वातः पवते। भीषोदेति सूर्यः। भीषास्मादग्निश्चेंद्रश्च। मृत्युर्धावति पंचम इति। सैषानंदस्य मीमांसा भ
वति। युवा स्यात्साधुयुवाध्यायकः। आशिष्ठो दृढिष्ठो बलिष्ठः। तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात॥
सएको मानुष आनंदः। तेयेशतं मानुषा आनंदाः॥ ८॥ सएको मनुष्यगंधर्वाणामानंदः। श्रोत्रियस्य चाका
महतस्य। तयेशतं मनुष्यगंधर्वाणामानंदाः। सएको देवगंधर्वाणामानंदः। श्रोत्रियस्य चाकामहतस्य।
तेतेयेशतं देवगंधर्वाणामानंदाः। सएकः पितॄणां चिरलोकलोकानामानंदः। श्रोत्रियस्य चाकामहतस्य।
तेयेशतं पितॄणां चिरलोकलोकानामानंदाः। सएक आजानजानां देवनामानंदः। श्रोत्रियस्य चाकामहत
स्य। तेयेशतमाजानजानां देवानामानंदाः। सएकः कर्मदेवानां देवानामानंदः। येकर्मणा देवानपियंति।
श्रोत्रियस्य चाकामहतस्य। तेयेशतं कर्मदेवानां देवानामानंदाः। सएको देवानामानंदः। श्रोत्रियस्य चा
कामहतस्य। तेयेशतं देवानामानंदाः। सएक इंद्रस्यानंदः। श्रोत्रियस्य चाकामहतस्य। तेयेशतमिं
द्रस्यानंदाः। सएको बृहस्पतेरानंदः। श्रोत्रियस्य चाकामहतस्य। तेयेशतं बृहस्पतेरानंदाः। सएकः
प्रजापतेरानंदः। श्रोत्रियस्य चाकामहतस्य। तेयेशतं प्रजापतेरानंदाः। सएको ब्रह्मण आनंदः। श्रोत्रि
यस्य चाकामहतस्य। सयश्चायं पुरुषे। यश्चासावादित्ये। सएकः। सयएवंवित्। अस्माल्लोकात्प्रेत्य।
एतमन्नमयमात्मानमुपसंक्रामति। एतं मनोमयमात्मानमुपसंक्रामति। एतं विज्ञानमयमात्मा
नमुपसंक्रामति। एतमानंदमयमात्मानमुपसंक्रामति। तदप्येष श्लोको भवति ॥ १॥ यतो वाचो निवर्तंते

५

ब्रह्म· ॥अप्राप्यमनसासह। आनंदंब्रह्मणो विद्वान्। नबिभेतिकुतश्चनेति। एतँ॑ हवावनतपति। किमहँ॑सा
धुनाकरवं। किमहंपापमकरवमिति। सयएवं विद्वानेते आत्मानँ॑स्पृणुते। उभेह्येवैषएते आत्मानँ॑स्पृ
२ णुते। यएवंवेद। इत्युपनिषत्। सहनाववतु। सहनौभुनक्तु। सहवीर्यंकरवावहै। तेजोस्विनावधीतमस्तुमा
विद्विषावहै ॐ शांतिः शांतिः शांतिः। श्रीः [illegible]

२